# संस्कृत वार्ता:

दिनाङ्क : 16.06.2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- 'जी-7 शिखरसम्मेलने भागं ग्रहीतुं प्रधानमन्त्री नरेन्द्रमोदी फ्रांस-देशस्य 'एवियन' नगरं प्राप्तवान्।
- ब्रातिस्लावायाम् आयोजितायाः 'वाराणसी-प्रदर्शिन्याः' प्रशंसां कुर्वन् प्रधानमन्त्री मोदी द्विपक्षीय-सम्बन्धानां सुदृढीकरणे कला-संस्कृतेः भूमिकां रेखांकितवान् ।
- नीट-यूजी पुनःपरीक्षायाः पूर्वं सर्वकारेण अस्य मासस्य द्वादश दिनाङ्कपर्यन्तं 'टेलीग्राम' प्रतिबन्धितम्; जून मासस्य त्रिंशत् दिनांकपर्यन्तं सन्देश-सम्पादन-सुविधा अपि निष्क्रिया भविष्यति।
- संयुक्तराष्ट्र-सुरक्षापरिषदि केवलं 'अस्थायि-आसनानाम्' विस्ताराय आगतं प्रस्तावं भारतेन प्रत्याख्यातं, वर्तमान-परिष्कारप्रक्रियां च 'विफलतायाः समीपम्' इति कथितम्।
- न्यूजीलैण्डस्य ऑकलैण्ड-नगरे जापान-दलं द्वे एकम् इत्यङ्कैः पराजित्य भारतीय-महिला-दलं 'एफ.आई.एच. नेशन्स कप' स्पर्धायाः उपान्त्यचक्रे प्रविष्टम्।

-----------------------------------

<u>जी-7 शिखर-सम्मेलन</u>

प्रधानमन्त्री नरेन्द्रमोदी जी-7 शिखर-सम्मेलने भागं ग्रहीतुं द्विदिवसीय-यात्रायां अद्य फ्रांसदेशस्य एवियन-नगरं प्राप्तवान्। प्रधानमन्त्रिणः इयं अनवरतं सप्तमी जी-7 उपस्थिति वर्तते , सहैव अस्मिन् प्रमुखे बहुपक्षीय-आयोजने भारतस्य इदं त्रयोदशं सहभागित्वं वर्तते। इयं शिखर-वार्ता भारतस्य कृते महत् सामरिक-महत्त्वं भजते, यतो हि प्रधानमन्त्री वैश्विक-पटले विकासशील-विश्वस्य समाह्वानानि दृढतया उपस्थापयिष्यति। अद्य सायङ्काले फ्रांस-देशस्य राष्ट्रपतिः इमैनुएल-मैक्रॉन इत्यसौ प्रधानमन्त्रिणः औपचारिकं स्वागतं विधास्यति। ततः परं श्रीमोदी

नूतन-सहभागिता-निर्माणं अथ अन्ताराष्ट्रिय-एकतायाः सुदृढीकरणम्" इति मुख्य-विषयाधारिते उच्चस्तरीय उपवेशने भागं भजिष्यति।

इतः पूर्वम्, प्रधानमन्त्री नरेन्द्रमोदी स्लोवाकिया-देशस्य यात्रां परिसमाप्य फ्रांस-देशाय प्रस्थितवान्। तेनोक्तं यत् तस्य स्लोवाकिया-यात्रया भारत-स्लोवाकिया-देशयोः द्विपक्षीय-सम्बन्धाः अतीव सुदृढाः भविष्यन्ति। यात्रायाः अनन्तरं सामाजिक-सञ्जालीयसन्देशे प्रधानमन्त्रिणा प्रख्यापितं यत्, उभयदेशयोः सुदृढ-व्यापारिक-सम्बन्धेभ्यः युवानः अत्यधिकं लाभान्वितः भविष्यति। सः स्लोवाकिया-सर्वकारं तत्रत्यं जनसमुदायं च आतिथ्य-सत्काराय कृतज्ञतां ज्ञापितवान्, तथा च स्वस्य समकक्षाय प्रधानमन्त्रिणे रॉबर्ट फिको इत्यस्मै च विशेषतः धन्यतां प्रकटितवान्।

-----------------------------------

## प्रधानमन्त्री वाराणसी

प्रधानमन्त्री नरेन्द्रमोदी प्रावोचत् यत्, कला-संस्कृत्योः जनान् आक्रष्टुं महती शक्तिर्भवति। प्रधानमन्त्री श्रीमोदी स्लोवाकिया-देशस्य राष्ट्रपतिः पीटर पेलेग्रिनी इत्येतौ विगतदिने स्लोवाकिया-देशस्य ब्रातिस्लावा-स्थिते राष्ट्रपति-प्रासादे वाराणसी-विषयाधारितां काञ्चन विशिष्टां चित्रकला-प्रदर्शिनीं दृष्टवन्तौ, यस्यां स्लोवाकिया-देशस्य एव कलाकारैः कृताः कृतयः प्रदर्शिताः आसन्। एतस्याः कलायाः कृते ब्रातिस्लावा-नगरे बनारस-कनेक्ट् इति नाम प्रदाय प्रधानमन्त्रिणा स्लोवाक-कलाकाराणां सृजनात्मक-प्रतिभायाः भूरिशः प्रशंसा कृता। विदेश-मन्त्रालयेन सूचितं यत्, इयं प्रदर्शिनी वाराणसी-नगरी इति विषयाधारिता आसीत्। अस्मिन् भारतस्य प्राचीनतमायाः जीवन्त-नगर्याः आध्यात्मिकं, सांस्कृतिकं, अथ च सामान्य-जनजीवनं कलाकृतिभिः अतीव सुन्दरतया चित्रितम् आसीत्।

-----------------------------------

## राष्ट्रीय-पात्रता- परीक्षा-नीट

राष्ट्रीय-पात्रता-सह-प्रवेश-परीक्षा NEET- इत्यस्याः पुनर्परीक्षा जूनमासस्य एकविंशति-तमे-दिनांके आयोजयिष्यते। परीक्षायाः पूर्वं भारत-प्रशासनेन टेलीग्राम- सन्देश-प्रेषण-अनुप्रयोगः

जूनमासस्य द्वाविंशतिदिनांकं यावत् प्रतिबन्धितः। राष्ट्रीय-परीक्षा-अभिकरणेन (NTA) तथा वैद्युत् एवं सूचना-प्रविधि-मन्त्रालयस्य निर्णयस्य स्वागतं कृतम्। अभिकरणस्य वक्तव्यानुसारेण , अयं प्रतिबन्धः पुनर्परीक्षादिनं तथा तदनन्तरकालं यावत् प्रभावि भविष्यति। अपि च टेलीग्राम-संस्थायै पूर्वप्रकाशित-सन्देशानां सम्पादन-सौविध्यम् अपि जूनमासस्य त्रिंशत्दिनांक -पर्यन्तं निष्क्रियं कर्तुं निर्देशः प्रदत्तः। एनटीए इत्यस्य मतानुसारम्, प्रश्नपत्र-भेदप्रसारं मिथ्या-अपवादान् तथा संघटित-प्रतिकृतिचौर-चक्राणां दुष्प्रवृत्तीः अवरोद्धुम् एषः निर्णयः गृहीतः। छात्राणां हितरक्षणाय तथा परीक्षायाः निष्पक्षतायै एते उपायाः क्रियन्ते।

------------------------------------

<u>संयुक्तराष्ट्रसुरक्षापरिषदः</u>

भारतेन संचेतना प्रदत्ता यत् संयुक्तराष्ट्रसुरक्षापरिषदः परिष्कारसम्बद्धाः प्रयासाः निष्फलाः भवेयुः यदि तस्य विस्तारः केवलम् अस्थायि-सदस्य-वर्ग-पर्यन्तमेव परिसीमितो भवति। संयुक्तराष्ट्रसङ्घे भारतस्य स्थायिप्रतिनिधिः राजदूतः हरीश-पर्वथनेनी महोदयः सुरक्षापरिषदः परिष्कारविषये प्रचलितानाम् अन्तरसर्वकारीयवार्तालापानां सभायाम् एतद् अभ्यधात्। श्रीपर्वथनेनी अवदत् यत् यदि परिषदः विस्तारः केवलम् अस्थायिसदस्यवर्गे एव विधीयते, तर्हि सः परिष्कारप्रयासः न केवलम् अपर्याप्तः अपितु वस्तुतः विफलतामेव गमिष्यति। यतः तेन सुरक्षापरिषदः पञ्चस्थायिसदस्यानां विद्यमानायाः निर्णयप्रक्रियायाः अधिकारसंरचनायाश्च किमपि मौलिकं परिवर्तनं न परिलक्ष्यते।

------------------------------------

<u>विकसित-भारत-युवा-संसद्</u>

नवदेहल्यां षड्विंशत्युत्तरद्विसहस्रतमवर्षस्य 'विकसित-भारत-युवा-संसद् कार्यक्रमस्य प्रतिभागिभिः सह संवादं कुर्वन् लोकसभाध्यक्षः ओम् बिरला लोकतन्त्रे जनसहभागितायाः महत्त्वस्योपरि बलं प्रदत्तवान्। अध्यक्षमहोदयेन प्रतिपादितं यत् भारतस्य लोकतन्त्रं केवलं शासनप्रणाली एव नास्ति, अपितु एषा संवाद-सहमति-सहभागितानां काचित् जीविता परम्परा अस्ति।

------------------------------------

<u>महिला-हॉकी</u>

महिला-हॉकी-क्रीडायाम्, न्यूजीलैण्ड-देशस्य ऑकलैण्ड-नगरे प्रचल्यमानायाः 'एफ.आई.एच. हॉकी नेशन्स कप' स्पर्धामालिकायाः उपान्त्यचक्रे भारतेन प्रवेशो प्राप्तः। 'पूल ए' इत्यस्य द्वितीये द्वन्द्वे भारतीय-महिला-दलेन जपान-दलं द्वे-एकम् इति अङ्कान्तरालेन पराजितम्। अस्याः प्रतियोगितायाः 'पूल ए' इत्यस्य अन्तिमे चक्रे गुरुवासरे भारतस्य सम्मुखं उरुग्वे-दलं भविष्यति।

------------------------------------

<u>भारतीय-ऋतु-विभागेन</u>

भारतीय-ऋतु-विभागेन सूचितं यत् अरुणाचलप्रदेशे, असमे, मेघालये, हिमालयपादप्रदेशे पश्चिमबङ्गाले सिक्किमराज्ये च एतेषु राज्येषु आगामि-रविवासरपर्यन्तं केषुचित् स्थानेषु तीव्रा अतितीव्रा च वर्षा सम्भाव्यते। तथा च तमिळनाडुराज्ये, पुडुच्चेरी-कराईकलइत्यत्र च आगामि-शुक्रवासरपर्यन्तं अतिवर्षायाः सम्भावना वर्तते। ऋतु -विभागस्य अनुसारेण अद्य दिल्ली-चण्डीगढ- हरियाणा- पञ्जाब- हिमाचलप्रदेश- आन्तरिककर्नाटक- जम्मू-कश्मीर- लद्दाख-झारखण्ड- मध्यप्रदेश- महाराष्ट्र-स्थलेषु मेघगर्जनेन सह वृष्टिः, विद्युत् च संभाव्येते अनेन सह प्रतिहोरा पञ्चाशत् किलोमीटरपरिमितवेगेन प्रबलवायुश् च सम्भाव्यते। जनाः आवश्यकजनसंचेतनां पालयन्तु, ऋतु -विभागस्य निर्देशान् च अनुसरन्तु।

।। इति वार्ताः ।।